# Shakyasimha Stotram

# शाक्यसिंहस्तोत्रम् १

## Document Information

Text title : Shakyasimha Stotram

File name : shAkyasiMhastotram1.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# शाक्यसिंहस्तोत्रम् १

नमः शाक्येन्द्राय ।
नमोऽस्तु लोकाधिप शाक्यराज सद्धर्मपङ्केरुहभास्कराय ।
क्लेशारिवर्गाभिहताय तुभ्यं सम्बोधिदीपैर्हतमोहजाल ॥ १॥

ब्रह्मर्षिराजर्षिसुरर्षिसङ्घैः प्राप्तुं न यच्छक्यमनेकरत्नैः ।
प्राप्तं त्वया ज्ञानमनन्तधर्मं येनाकरिष्यः सकलस्य हैत्यम् ॥ २॥

प्रवर्तितं येन सुधर्मचक्रं यस्मिन् मही सोदधिशैलराजा ।
आनन्दितेव चलिता ह्यजस्रं नमोऽस्तु तुभ्यं त्रिभवाधिपाय ॥ ३॥

यस्मिंश्च वातास्त्रिगुणेन युक्ता ववुर्नभस्तो निपतन्ति वस्त्राः(र्षाः) ।
विचित्रपुष्पाणि सुगन्धि वारि नमोऽस्तु तुभ्यं जगदेकनाथ ॥ ४॥

अनन्यजेयो नमुचिर्वरिष्ठैः सैन्यैर्वृतः कोटिशतप्रमाणैः ।
जितं त्वयैकेन निरायुधेन नमोऽस्तु तुभ्यं बलवर्तनाय ॥ ५॥

येन त्रिलोकीं प्रतिपालितुं तन्मायासुकज्ज्वाज्वलयन्(?) प्रजातम् ।
स्वभावतो जन्मजरान्तकारिणे नमोऽस्तु तुभ्यं जगदेकनाथ ॥ ६॥

त्रैधातुलोकेषु विकासितुं तां सम्बोधिचर्यामपवर्गसेतुम् ।
तुषितायुतो जन्म चकार मर्त्ये नमोऽस्तु तुभ्यं वरबोधिराज ॥ ७॥

सम्यक् प्रतिज्ञां प्रतिकृत्य येन संप्रेष्यते मोक्षपुरे जनौघः ।
तदर्थमायासि च मर्त्यलोके नमोऽस्तु तुभ्यं सुमहत्प्रतिज्ञ ॥ ८॥

यश्चाष्टकं ब्रह्मकृतं सुपुण्यं पठिष्यति शाक्यवराग्रतः स्थः ।
दुःखं महापापभयं च हित्वा श्रीश्रीघने यास्यति पत्तने मुदा ॥ ९॥

इति ब्रह्मणा कृतं श्रीशाक्यसिंहस्तोत्रं सम्पूर्णम् ॥

*Shakyasimha Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*